# पाठ-२७(ब)
# जनसंचारमाध्यमः

**सारान्शः**
येन माध्यमेन जनसामान्यं प्रति विविधसमाचाराणां सन्देशानां वार्त्तानां च सम्प्रेषणं भवति सः एव जनसंचारमाध्यमः कथ्यते ।
जनसंचारमाध्यमाः स्थूलतया द्विधा विभक्तुं शक्यते।
**(क)** मुद्रणमाध्यमः
**(ख)** वैद्युदान्विकमाध्यमः

**(क) मुद्रण- माध्यमः-**
जनस चारस्य मुद्रणमाध्यमेषु विविधः पत्रपत्रिकाः भवन्ति । संस्कृतभाषायां शताधिकाः पत्रपत्रिका प्रकाश्यन्ते ।
**<u>(ख) वैद्युदान्विकमाध्यमः</u>**
जनस चारस्य वैद्युदान्विकमाध्यमः द्विविधः भवति ।
**(1)** श्रव्यमाध्यमः **(ऑडियो मीडिया)**
**(2)** दृश्यश्रव्यमाध्यमः च **(ऑडियो विजुअल मीडिया)**

**(1)श्रव्यमाध्यमः-**
जनसंचारस्य श्रव्यमाध्यमेषु सर्वाधिक प्रमुखता आकाशवाण्याः अस्ति। अनेकविधाः संस्कृत-कार्यक्रमाः प्रसार्यन्ते ।
**(2)दृश्यश्रव्यमाध्यमः-**
जनस चारस्य दृश्यश्रव्यमाध्यमेषु सर्वाधिका पुरातनी प्रणालिका कार्यक्रमवाहिका वा **(channel)** 'दूरदर्शनं' वर्तते।

**<u>दूरदर्शनस्य प्रणालिकाः-</u>**
सम्प्रति दूरदर्शनस्यापि, अनेकाः प्रणालिकाः सन्ति- डी.डी. न्यूज, डी.डी स्पोर्ट्स, डी.डी ज्ञानभरती।आसु डी.डी. न्यूज, डीडी ज्ञानदर्शनम् इत्यनयोः द्वयोः प्रणालिकयोः संस्कृतकार्यक्रमाणां नियतं प्रसारणं भवति ।

**<u>आकाशवाणी- दूरदर्शनयोः वार्ता-स्रोतांसि-</u>**
जनसंचारस्य सर्वेषामपि माध्यमानां वार्त्तानां स्रोतांसि प्रायेण त्रिविधानि भवन्ति । तथा हि-
**(क)** वार्ताभिकारणानि **(न्यूज एजेन्सीज)**
**(ख)** प्रशासनिकविज्ञप्तयः **(सर्कुलर्स आफ गर्वनमेण्ट)**
**(ग)** स्वीयाः वार्ताहराश्च **(ओन जर्नलिस्ट्स/रिपोर्टर्स)**

**<u>आकाशवाण्यां वार्त्ता-निर्माणप्रक्रिया-</u>**

**वार्त्तापदस्य अर्थः-** हिन्दीभाषायां यत् 'समाचार',आंग्लभाषायां 'न्यूज',तत् हि संस्कृतभाषायां जनसंचारमाध्यमेषु 'वार्त्ता इति पदेन व्यपदिश्यते ।
**वार्त्तानिर्माणम्-**
विविधस्रोतेभ्यः लब्ध सूचनाभ्यः सम्पादकाः एव वार्त्तानिर्माणम् कुर्वन्ति।
**वार्त्ताप्रसारणकक्षः-**
वार्ताप्रसारणकक्षः तु शब्दानुकूलितो **(Sound proof)**,वातानुकूलितो, सम्मुखं ध्वनि प्रापकयन्त्रै **(Mike)** युक्तः भवति।

**दूरदर्शने वार्त्ता-निर्माण–प्रक्रिया-**
दूरदर्शने अपि प्रायः तेभ्यः एव स्रोतोभ्यः सूचनाः प्राप्यन्ते येभ्यः स्रोतोभ्यः आकाशवाण्यां सूचनाः लभ्यन्ते । दूरदर्शनस्य अनेके कार्यालयाः सन्ति । तेषु अन्यतमः नवदिल्लीस्थे 'खेलगांव' इति क्षेत्रे 'केन्द्रीयकार्यक्रमनिर्माणकेन्द्रम्' **(Centrl Production Centre)** नाम्ना प्रसिद्धः।

**योग्यतां वर्धयत**
**दूरदर्शने**- संस्कृतवार्त्ताणां प्रथमं प्रसारणं 1994 तमे वर्षे अगस्तमासे एकविंशे दिवसे श्रावणीपूर्णिमावसरे रविवासरे अभवत्। ततः प्रभृति प्रतिरविवासरम् एतद् दशकलावधिकं संस्कृतवार्त्तावृत्तम् अष्टवर्षपर्यन्तं नियमितरूपेण अपराह्णे प्रसारितम् अभवत्। 2002 तमे वर्षे अगस्तमासस्य द्वाविंशदिवसात् शुक्रवासरात् दूरदर्शनतः संस्कृतवार्त्तानां दैनिकं पञ्चकालावधिप्रसारणं प्रारब्धम्। एतत् प्रसारणं प्रातः काले दश-वादनाद् आरभते स्म । परं सम्प्रति दूरदर्शने संस्कृतवार्त्ताप्रसारणं प्रत्यहं प्रातः 6.55–7.00 वादनं यावद् भवति । इदानीम् एतत् संस्कृतवार्त्ताप्रसारणं दूरदर्शनस्य 'डी.डी.न्यूज' प्रणालिकातः प्रसार्यते ।
<u>**आकाशवाण्यां**</u>-संस्कृतभाषायां वार्त्तानाम् आद्यं वाचनं भारतदेशे आकाशवाणीतः 1974 तमे वर्षे जूनमासे त्रिंशत् तमे दिनाङ्के प्रातः नववादने अभवत् । एतद् वाचनं सुश्रियः विजयश्रियः स्वरैः अनुष्ठितम् । अत्र ज्ञेयं वर्तते यद् इतः पूर्वमपि जर्मनीदेशस्य श्रव्यप्रसारण माध्यमकेन्द्रात् संस्कृतभाषायां साप्ताहिकं वार्त्ताप्रसारणं भवति स्म। सम्प्रति आकाशवाण्याः दिल्लीकेन्द्रात् संस्कृतवार्त्ताः प्रतिदिनं द्विवारं प्रसारिताः भवन्ति ।**प्रातः - 6:55-7:00 वादने**
**सायम्-6:10–6:15 वादने**

**आवश्यकोऽयं ज्ञानम्**

अत्र संस्कृतवार्त्ताप्रसारण–प्रक्रिया प्रवाहचित्रमाध्यमेन (Flow chart) प्रदर्श्यते –




**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।